च मेदि० । रोहित+स्त्रियां ङीप् तस्य नत्वे णत्वम् । ७रक्तवर्णवत्यां स्त्रियाम् । सा च ८हरितश्याम,९काश्म-र्याम्, १०मञ्जिष्ठायाञ्च राजनि० । ११सुरभिकन्यायां कालिकापु० "अष्टवर्षा भवेत् गौरी नववर्षा च रोहिणी" इत्युक्तायां नववर्षायां १२कन्यायां १३गलरोगभेदे भावप्र० "रोहिणीनामकगलरोगाणां नामानि संख्याञ्चाह "रोहिणी पञ्चधा प्रोक्ता कण्ठशालूक एव च । अधिजिह्वश्च वलयोऽलासनामैकवृन्दकः । ततो वृन्दः शतघ्नी च गिलायुः कण्ठविद्रधिः । गलौघः स्वरघ्नश्च मांसतालस्तथैव च । विदारी कण्ठदेशे तु रोगा ह्यष्टाविति स्मृताः" । तत्र पञ्चानामपि रोहिणीनां सामान्यसंप्राप्तिमाह "गलेऽनिलः पित्तकफौ च मूर्च्छितौ प्रदूषय मांसञ्च तथैव शोणितम् । गलोपसंरोधकरैस्तथाङ्कुरैर्निहन्त्यसून् व्याधिरियं हि रोहिणी" । अनिलः मूर्च्छितः पृथक् कफपित्तौ च मूर्च्छितौ पित्तं वा मूर्च्छितं कफो वा मूर्च्छितः न तु त्रयोऽपि मूर्च्छिताः" पृथग्दोषजाया अविवक्षमाणत्वात् । तत्रा वातजायालक्षणमाह "जिह्वासमन्तादृभृशवेदनास्तु मांसाङ्कुराः कण्ठविरोधनाः स्युः । सा रोहिणी वातकृता प्रदिष्टा वातात्मकोपद्रवगाढयुक्ता" । जिह्वासमन्तात् जिह्वायाः सर्वतः । "वातात्मकोपद्रवगाढयुक्ता स्तम्भादिभिरतिशयेन युक्ता । पित्तजामाह "क्षिप्रोद्गमा क्षिप्रविदाहपाका तीव्रज्वरा पित्तनिमित्तजाता" । श्लेष्मजामाह "स्रोतोनिरोधिन्यपि मन्दपाका गुर्वी स्थिरा सा कफसम्भवा तु । स्रोतोऽत्र कण्ठस्रोतः । सन्निपातजामाह "गम्भीरपाकिन्यनिवार्य्यवीर्य्या त्रिदोषलिङ्गा त्रिभवा भवेत् सा" । रक्तजामाह "स्फोटैश्चिता पित्तसमानलिङ्गा साध्या प्रदिष्टा रुधिरात्मिका तु" । रक्तजेतरासंहारकत्वावधिमाह "सद्यस्त्रिदोषजा हन्ति त्र्यहात् कफसमुद्भवा । पञ्चाहात् पित्तसम्भूता सप्ताहात् पवनोत्थिता" । [नाथाद्योऽप्यत्र ।

**रोहिणीपति** पु० ६त० । १चन्द्रे, २वसुदेवे च रोहिणी-

**रोहिणीव्रत** न० रोहिणीयुक्ताष्टम्यां व्रतम् । रोहिण्युपलक्षितायां भाद्रकृष्णाष्टम्यां कर्त्तव्ये उपवासरूपे व्रते । कृष्णाष्टमीशब्दे २२२०पृ०दृश्यम् । [२४२२ पृ०दृश्यम् ।

**रोहिणीशकट** न० ६त० । व्योमस्थे ताराभेदे खगोलशब्दे

**रोहित्** पु० रुह-इति । १सूर्य्ये मेदि० २वर्णभेदे च ३मत्स्यभेदे पु०उज्ज्वल० । ४लताभेदे ५कन्यायाञ्च स्त्री ङीप् मेदि० ।

**रोहित** न० रुह इतच् । १रुधिरे २कुङ्कुमे ३ऋजौ इन्द्रचापे मेदि० । ४रोहितकवृक्षे पु० स्वनामख्याते ५मत्स्यभेदे पुंस्त्री० स्त्रियां ङीप् मेदि० । "रक्तोदरो रक्तमुखो रक्ताक्षो रक्तपक्षतिः । सशपक्षो भवन्त्रेष्ठो रोहितः कथितो बुधैः । रोहितः सर्वमत्स्यानां वरो वृष्योऽर्द्दितार्त्तिजित् । कषायानुरसः स्वादुर्वातघ्नो नातिपित्तकृत् । ऊर्द्ध्वजत्रुगतान् रोगान् हन्याद्रोहितमुण्डकम्" भावप्र० । ६रक्तवर्णे पु० ७तद्वति त्रि० अमरः । स्त्रियां ङीप् तस्य नत्वे णत्वम् । ८अग्निवाहने मृगभेदे निघण्टुः । स्वार्थे क । रोहितक उक्तार्थे ९वृक्षभेदे अमरः ।

**रोहिताश्व** पु० रोहितो मृगभेद अश्व इव गतिसाधनम् यस्य । वह्नौ त्रिकाण्डशेषः ।

**रोहितेय** पु० रोहित एव स्वार्थे ढ । रोहितकवृक्षे रत्नको०

**रोहिन्** पु० रोहति पुनःपुनश्छिन्नोऽपि प्रादुर्भवति रुह-णिनि । १रोहितकवृक्षे २वटवृक्षे ३अश्वत्थवृक्षे च । मेदि० । ४रोहणवति त्रि० स्त्रियां ङीप् ।

**रोहिष** पु० रुह-इषन् । स्वनामख्याते कत्तृणे मेदि० ।

**रौक्ष्य** न० रूक्षस्य भावः ष्यञ् । १पारुष्ये २अचिक्कणतायाञ्च ।

**रौचनिक** त्रि० रोचनया रक्तः अण् । रोचनया रक्ते ।

**रौच्य** पु० । त्रयोदशे मनुभेदे मत्स्यपु० ९ अ० ।

**रौट(ड)** अनादरे भ्वा० पर० सक० सेट् । रौट(ड)ति अरौ(डी)टीत् । ऋदित् चङि न ह्रस्वः ।

**रौद्र** न० रुद्रो देवतास्य अण् । १सूर्य्यतापे, २उग्ररसे च । ३तद्वति मेदि० ४भीषणे च त्रि० ५रसभेदे अमरः । "रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः । आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम् । मुष्टिप्रहारपतनविकृतच्छेदावदारणैश्चैव । संग्रामसम्भ्रमाद्यैरस्योद्दीप्तिर्भवेत् प्रौढा । भ्रूविभङ्गोष्ठनिर्दंशबाहुस्फोटनतर्जनाः । आत्मावदानकथनमायुधोत्क्षेपणानि च । अनुभावास्तथाक्षेपक्रूरसन्दर्शनादयः । उग्रतावेगरोमाञ्चस्वेदवेपथवो मदः । मोहामर्षादयस्तत्र भावाः स्युर्व्यभिचारिणः" सा० द० ।

६५दुर्गायां ७रुद्रजटावृक्षे च स्त्री ङीप् मेदि० ।

**रौप्य** न० रूप्यमेव अण् । रजते राजनि० ।

**रौम** न० रुमायां लवणखनिभेदे भवः अण् । शाम्भरिलवणे । स्वार्थे क । तत्रैवार्थे अमरः ।

**रौरव** पु० रोरूयतेऽत्र रु-यङ् क्विप् तेन प्राप्यः तस्यायं वा अण् । १नरकभेदे अमरः । २चञ्चले, ३धूर्त्ते, ४घोरे च त्रि० शब्दर० । ५सामभेदे न० । तच्च साम ऊहगाने